# 2022

## SANSKRIT — HONOURS

**Paper : CC-1**

**(Classical Sanskrit Literature – Poetry)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Section - A**

**(Marks : 10)**

**Unit - II**

1. अधोदत्तेषु श्लोकेषु कयोश्चिद्द्वयोः मातृभाषया आङ्गलभाषया वा अनुवादः कार्यः। 5×2

(क) रेखामात्रमपि क्षुण्णादामनोर्वत्मनः परम्।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः॥

(ख) अनकृष्टस्य विषयैर्विद्यानां पारदृश्वनः।
तस्य धर्मरतेरासीद् वृद्धत्वं जरसा विना॥

(ग) आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।
आगमैः सदृशारम्भ आरम्भसदृशोदयः॥

*अथवा,*

रघुवंशमहाकाव्यस्य प्रथमसर्गमनुसृत्य राज्ञः दिलीपस्य गुणाः यथापाठ्यं विव्रियताम्। 10

**Section - B**

**(Marks : 20)**

**Unit - I**

2. कुमारसम्भवमहाकाव्यस्य पञ्चमसर्गे विधृतायाः पार्वत्या समाचरितायाः तपस्यायाः वर्णनं कृत्वा तथाविधतपश्चरणस्य कारणमपि लिख्यताम्। 7+3

Please Turn Over

**अथवा,**

(क) अधोलिखितयोः ***कस्यचिदेकस्य*** आङ्गलभाषया वङ्गभाषया वा अनुवादः कार्यः। 5

(अ) मनीषिताः सन्ति गृहेषु देवता–
स्तपः क्व वत्से क्व च तावकं वपुः।
पदं सहेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुनः पतत्रिणः।।

(आ) अरण्यबीजाञ्जलिदानलालिता-
स्तथा च तस्यां हरिणा विशश्वसुः।
यथा तदीयैर्नयनैः कुतूहलात्
पुरः सखीनाममिमीतलोचने।।

(ख) अधोलिखितयोः ***कस्यचिदेकस्य*** भावः सम्प्रसार्यताम्। 5

(अ) प्रियेषु सौभाग्यफला हि चारुता।

(अ) पङ्कजं सशैवलासङ्गमपि प्रकाशते।

## Unit - II

3. (क) अधोलिखितयोः ***कस्यचिदेकस्य*** संस्कृतभाषया देवनागरीलिप्या च सप्रसङ्गं व्याख्या कार्या। 7×1

(अ) शुचौ चतुर्णां ज्वलतां हविर्भुजां शुचिस्मिता मध्यगता सुमध्यमा।
विजित्य नेत्र-प्रतिघातिनीं प्रभामनन्यदृष्टिः सवितारमैक्षत।।

(आ) स्वयं विशीर्णद्रुमपर्णवृत्तिता परा हि काष्ठा तपसस्तया पुनः।
तदप्यपाकीर्णमतः प्रियंवदां वदन्त्यपर्णेति च तां पुराविदः।।

(ख) अधोलिखितेषु ***त्रयाणामुत्तरं*** लेखनीयम्। तेषु न्यूनतया **द्वयोः** उत्तरं **संस्कृतभाषया देवनागरीलिप्या** च देयम्। 1×3

(अ) कुमारसम्भवस्य पञ्चमसर्गस्य वर्णितविषयः कोऽस्ति?

(आ) कस्मिन् विषये केषां वयः जनैः न समीक्ष्यते?

(इ) "तपो महत् सा चरितुं प्रचक्रमे"– का तपः चरितुं प्रचक्रमे?

(ई) कीदृशः आसीत् पार्वत्याः पारणाविधिः?

(उ) "महातपः साक्ष्य इव स्थिताः क्षपाः"– "क्षपा–" शब्दस्य कोऽर्थः?

## Section - C

**(Marks : 20)**

### Unit - I

4. किरातार्जुनीयमहाकाव्यस्य प्रथमसर्गे वनेचरस्य उक्तिषु प्रतिबिम्बिता दुर्योधनस्य राज्यशासनपद्धतिः संस्कृतभाषया देवनागरीलिप्या च लेखनीया। 10

***अथवा,***

(क) अधोलिखितयोः यथेच्छ***मेकस्य*** संस्कृतभाषया देवनागरीलिप्या च सप्रसङ्गं व्याख्या कार्या। 5

(अ) कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः।
न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः॥

(आ) अनारतं तेन पदेषु लम्भिता विभज्य सम्यग् विनियोगसत्क्रियाः।
फलन्त्युपायाः परिबृंहितायतीरुपेत्य सङ्घर्षमिवार्थसम्पदः॥

(ख) अधोलिखितयोः कस्य***चिदेकस्य*** संस्कृतभाषया देवनागरीलिप्या च भावः सम्प्रसार्यताम्। 5

(अ) हितं मनोहारि च दुर्लभं वचः।

(आ) निगूढतत्त्वं नयवर्त्म विद्विषाम्।

### Unit - II

5. अधोलिखितेषु ***पञ्चानां*** प्रश्नानामुत्तरं पूर्णवाक्येन संस्कृतभाषया देवनागरीलिप्या च देयम्। 2×5

(क) दुर्योधनः कं यौवराज्ये नियुज्य किम् अकरोत्?

(ख) कस्य पराक्रममनुस्मृत्य दुर्योधनः व्यथितोऽभवत्?

(ग) दुर्योधनस्य शासनकाले कुरुदेशः देवमातृको नदीमातृको वा अभवत्?

(घ) बलवद्भिः शत्रुभिः सह वैरस्यावसानं कीदृशं भवति?

(ङ) केषां गिरः प्रवृत्तिसारा भवन्ति?

(च) दुर्योधनः कथम् अग्नेः तुष्टिविधानमकरोत्?

(छ) के प्राणविनिमयेनापि दुर्योधनस्य प्रियकार्याणि कर्तुमिच्छन्ति?

**Section - E**

**Unit - I & II**

**(Marks : 15)**

6. अधोलिखितेषु ***त्रयाणां*** टीका लेखनीया। 5×3

(क) शिशुपालवधम्।

(ख) अश्वघोषः।

(ग) गीतगोविन्दम्।

(घ) श्रीहर्षः।

(ङ) भारविः।